# संस्कृतवार्ता:

दिनाङ्क :-04.03.2025

प्रात: - 06:55

**अथ वार्ता:**

**प्रधानमन्त्री–बेल्जियमस्य राजकुमारी**

बेल्जियमदेशीया राजकुमारी आस्ट्रिड -इत्येषा या हि भारत प्रवासरतास्ति साद्य नवदिल्ल्यां प्रधानमन्त्रिणं नरेन्द्रमोदिनं मिलिष्यति। एषा अस्य मासस्य अष्टमदिनाङ्कपर्यन्तं भारत-यात्रायामास्ति इति सूच्यते। बेल्जियमदेशस्य राजकुमारी अथ च रक्षामन्त्री थियो-फ्राङ्केन इत्येष: ह्य: नव दिल्ल्यां केन्द्रीयरक्षामन्त्रिणा राजनाथसिंहेन सह मेलनं कृतवन्तौ। अत्रावधौ उभयो: देशयो: मध्ये रक्षौद्योगिक-सहयोगं वर्धयितुम् अनेकेषु उपायेषु चर्चा: सम्पादिता:। अपि च संस्थागत-रक्षा-सहयोग तन्त्रस्य अन्वेषणायापि सहमतौ अभवताम् ।

**प्रधानमन्त्री/अर्थसंकल्पनासत्रम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्य-श्रव्य-परान्तर्जालीयमाध्यमेन तिसृषु अर्थसंकल्पनापत्रस्य पश्चादेव आभासियकार्यशालासु भागं ग्रहीष्यति। एता: कार्यशाला: सूक्ष्म-लघु-मध्यमोद्योगानां विकासास तथा च विनिर्माणाय निर्याताय परमाणूर्जा-अभियानाय निवेशाय व्यापाराय च आयोज्यन्ते। प्रधानमन्त्री अत्रावसरे उपस्थितान् जनान् अपि सम्बोधयिष्यति। वेबिनार-इत्याख्या कार्यशाला सर्वकारीयाधिकारिण: उद्योगजगत: नेतार: व्यापारविशेषज्ञा: च भारतस्य औद्योगिक-व्यापारोर्जा-रणनीतिषु विचारविमर्शाय एकेन सहयोगि-मञ्चत्वेन कार्यं करिष्यति।

**निर्वाचनायोग:-सम्मेलनम्**

निर्वाचनायोग: अद्यारभ्य नवदिल्लीस्थिते भारतीयान्ताराष्ट्रीय-लोकतन्त्र-निर्वाचनप्रबन्धन-संस्थाने समेषां राज्यानां केन्द्रशासितप्रदेशानाञ्च मुख्यनिर्वाचनाधिकारिभि: सह द्विदिवसीयं सम्मेलनम् आयोजयिष्यति। ज्ञानेशकुमारस्य मुख्यनिर्वाचनायुक्तस्य पदभारग्रहणानन्तरं प्रथमं हि तावत् एतत् सम्मेलनम् आयोज्यते। द्विदिवसात्मकं सम्मेलनम् राज्यानां केन्द्रशासितप्रदेशानाञ्च निर्वाचनाधिकारिभ्य: विचार- विमर्शाय पारस्परिकावगमनाय च मञ्चं प्रदास्यति।

**जयशङ्करयात्रा**

विदेशमन्त्री डॉ. एस्. जयशङ्कर: अद्य ब्रिटेन-आयरलैण्ड-देशयो: आधिकारिकयात्रायां गमिष्यति। यात्रावधौ विदेशमन्त्री स्वकीयेन समकक्षेण विदेशसचिवेन डेविड-लैमी-इत्यमुना चर्चां विधास्यति तथा च अन्यै: गणमान्यजनै: सह मिलिष्यति।

विदेशमन्त्रीलयानुसारि भारत-ब्रिटेन-देशौ एकं व्यापक-कार्यनीतिकं सहभागित्वं विनिमयीकरोतीति। आयरलैण्डदेशस्य द्विदिवसीय- यात्राकाले डॉ. जयशङ्कर: स्वीयेन आयरिश-समकक्षेण साइमन-हैरिस इत्येतेन सह मेलनं करष्यिति। अपि च भारतीय-समुदायस्य सदस्यै: सहापि मेलनं विधास्यति।

रक्षा-प्रतिवेदनम्

रक्षासचिव: राजेशकुमार सिंह: भारतीय-वायुसैन्यबलस्य क्षमता वृद्धये अधिकारप्राप्तसमितये ह्य: नवदिल्ल्यां रक्षामन्त्रिणं राजनाथ सिंह प्रतिवदेनं प्रस्तुतवान्। समित्या प्रमुखेषु क्षेत्रेषु बलं प्रदत्तम् तथा च भारतीयवायुसेनाया: अभिष्ट-क्षमता-वृद्धिगतलक्ष्यानाम् अवाप्तये अल्प-मध्यमदीर्घावधिषु कार्यान्वयनाय अनुशंसा कृतास्ति।

ट्रम्प:

अमरिकादेशस्य राष्ट्रपति: डोनाल्ड-ट्रम्प इत्यसौ कथितवान् यत् मेक्सिको-कनाडा-देशयो: अद्यारभ्य पञ्चविंशतिप्रतिशतं शुल्कं निवारयितुं न संभावना वर्तते येन हि उत्तरामेरिकादेशे नूतनानाम् अर्थिकबाधानां सम्भावनायां वित्तीय-विपणय: व्याकुला: सन्तीति।

क्रिकेटप्रतिस्पर्धायाम्

पुरुषाणां आई.सी.सी. चैम्पियन्स-ट्रॉफी इत्येतस्यां क्रिकेट-प्रतिस्पर्धायाम् अद्य मध्याह्ने दुबय्यम् उपान्त्यचक्रके द्वन्द्वे भारत-ऑस्ट्रेलियादयो: मध्ये स्पर्धा भविष्यति। अस्या: प्रतिस्पर्धाया: प्रसारणं सार्ध-द्वि-वादने भविष्यति। तत्रैव श्व: लाहौरनगरे द्वितीये उपान्त्ये चक्रके द्वन्द्वे दक्षिणाफ्रीका-न्यूजीलैण्ड-दलयो: मध्ये अपरा प्रतिस्पर्धा भविष्यति। ।

।। इति वार्ता:।।